# एकादशः पाठः
# नीत्या स्वकार्यं साधनीयम्

पञ्चतन्त्रं नीतिकथासाहित्यस्य प्रथमं काव्यमस्ति। अस्य रचनाकारः विष्णुशर्मा आसीत्। पञ्चतन्त्रे पूर्वं द्वादशभागाः निबद्धा आसन् किन्तु साम्प्रतं पञ्चभागाः एव उपलभ्यन्ते– मित्रभेदः, मित्रलाभः, सन्धिविग्रहः, लब्धप्रणाशः, अपरीक्षितकारञ्चेति। सम्पूर्णे पञ्चतन्त्रे गद्यभागेन सह ११३ श्लोकाः ७५ उपकथाश्च समुल्लसन्ति। पञ्चतन्त्रस्य प्रथमोऽनुवादः पहलवी–भाषायां ख्रिस्तस्य षष्ठशताब्द्याम् अभवत्। पञ्चतन्त्रस्य रचनाकालः ईसवीयस्य तृतीयशताब्दी आसीत् इतिविदुषां विवेचनानुसारेणप्रतीयते।

महिलारोप्यराजा अमरशक्तेः त्रयः पुत्राः परं ते च मूर्खाः आसन्। एकदा स विष्णुशर्मणो शिक्षणविषये माहात्म्यं श्रुतवान् अतएव सत्कृत्य तमानीतवान्। अमरशक्तिः पुत्रत्रयं शिक्षयितुं निवेदितवान्। विद्वान् पं. विष्णुशर्मा अपि तान्पाठयितुं प्रतिज्ञातवान्। कथात्मकशिक्षणेन ते त्रयोऽपिराजपुत्राः स्वल्पकालेन एव विद्वांसः नीतिनिपुणश्चाभवन्।

सङ्कलितकथा पञ्चतन्त्रस्य चतुर्थ तन्त्रः लब्धप्रणाशतः गृहीता यस्यां प्रधानशिक्षा मिलति यद् बुद्धिमान् मनुष्यः स्वकार्यं नीत्या साधयति। अस्मिन् संसारे अनेकैः मनुष्यैः सह सम्पर्कः भवति, ते च भिन्न–भिन्नविचारवन्तः सन्ति। अधिकबलशालिनः अपि सन्ति, निर्बलाः अपि सन्ति। तैः सह पृथक्–पृथक् व्यवहारेण स्वकार्यं साधनीयम्। मूर्खास्तु केवलं अहङ्कारेण स्वकार्यहानिम् एव कुर्वन्ति। उत्तमपुरुषं नम्रतया प्रणम्य स्वकार्यं साधनीयम्, शूरः भेदनीत्या स्वानुकूलः कार्यः, यः निकृष्टः अस्ति किन्तु बलशाली वर्तते तस्य कृते स्वल्पप्रदानम् उचितम्, यश्च समपराक्रमः किं वा दुर्बलः सः पराक्रमेण जेतव्यः। एतदेव राजनीतेः मूलमन्त्रम्।

आसीत् कस्मिंश्चित् वनप्रदेशे महाचतुरको नाम श्रृगालः, तेन कदाचित् अरण्ये स्वयं मृतो गजः समासादितः। सः तस्य समन्तात् परिभ्रमति, परं कठिनां त्वचं भेत्तुं न शक्नोति। अथ अत्र अवसरे इतश्चेतश्च विचरन् कश्चित् सिंहस्तत्रैव प्रदेशे समाययौ। अथ सिंहः समागतं दृष्ट्वा, स क्षितितलविन्यस्तमौलिमण्डलः, संयोजितकरयुगलः, सविनयमुवाच– 'स्वामिन्! त्वदीयोऽहं लागुडिकः स्थितस्त्वदर्थं गजमिमं रक्षामि। तदेनं भक्षयतु स्वामी'।

तं प्रणतं दृष्ट्वा सिंहः प्राह – भो! नाहमन्येन हतं सत्त्वं कदाचिदपि भक्षयामि। उक्तञ्च –

**'वनेऽपि सिंहा मृगमांसभक्ष्याः, बुभुक्षिता नैव तृणं चरन्ति।**
**एवं कुलीना व्यसनाभिभूताः, न नीतिमार्गं परिलङ्घयन्ति'।।**

तत्तवैव गजोऽयं मया प्रसादीकृतः। तत् श्रुत्वा शृगालः सानन्दमाह- युक्तमिदं स्वामिनो निजभृत्येषु। अथ सिंहे गते, कश्चित् व्याघ्रः समाययौ, तमपि दृष्ट्वा असौ व्यचिन्तयत्- अहो! एकस्तावद् दुरात्मा प्रणिपातेन अपवाहितः। तत्कथमिदानीमेनमपवाहयिष्यामि ? नूनं शूरोऽयं । न खलु भेदं विना साध्यो भविष्यति। उक्तञ्च यतः -

**'न यत्र शक्यते कर्तुं साम दानमथापि वा ।**
**भेदस्तत्र प्रयोक्तव्यो यतः स वशकारकः' ।।**

किञ्च- सर्वगुणसम्पन्नोऽपि भेदेन बध्यते, एवं सम्प्रधार्य तस्याभिमुखो भूत्वा गर्वादुन्त- कन्धरः ससम्भ्रममुवाच्– माम ! कथमत्र भवान् मृत्युमुखे प्रविष्टः!। येन एषः गजः सिंहेन व्यापादितः। स च मामेतद्रक्षणे नियुज्य नद्यां स्नानार्थं गतः। तेन च गच्छता मम समादिष्टं- 'यदि कश्चिदिह व्याघ्रः समायाति तर्हि त्वया सुगुप्तम् ममाऽवेदनीयम्। येन वनमिदं मया निर्व्याघ्रं कर्तव्यम् । यतः- पूर्वं व्याघ्रेणैकेन मया व्यापादितो गजः शून्ये भक्षयित्वा उच्छिष्टतां नीतः। तद्दिनादारभ्य व्याघ्रान्प्रति प्रकुपितोऽस्मि।'

तत् श्रुत्वा व्याघ्रः सन्त्रस्तः तमाह– 'भो भागिनेय ! देहि मे प्राणदक्षिणाम्। त्वया तस्य अत्र चिराय आयातस्य अपि मदीया काऽपि वार्ता न आख्येया।' एवमभिधाय सत्वरं पलायाञ्चक्रे। अथ गते व्याघ्रे, तत्र कश्चित् द्वीपी समायातः। तमपि दृष्ट्वा असौ व्यचिन्तयत दृढदंष्ट्रोऽयं चित्रकः। तदस्य पार्श्वादस्य गजस्य यथा चर्मच्छेदो भवति, तथा करोमि। एवं निश्चित्य, तमप्युवाच– 'भो भगिनीसुत! किमिति चिरात् दृष्टोऽसि ? कथञ्च बुभुक्षितः इव लक्ष्यसे ? तदतिथिरसि मे। तदेष गजः सिंहेन हतस्तिष्ठति, अहञ्चास्य तदादिष्टो रक्षपालः। परं- तथापि यावत्सिंहोः न समायाति, तावदस्य गजस्य मांसं भक्षयित्वा, तृप्तिं कृत्वा, द्रुततरं व्रज' ।

स आह– माम! यद्येवं तन्न कार्यं मे मांसाशनेन, यतः- 'जीवन्नरो भद्रशतानि पश्यति'। तद् अहमितोऽपयास्यामि। शृगालः आह– भो अधीर! विस्रब्धो भूत्वा, भक्षय त्वम् । तस्य आगमनं दूरतोऽपि तवाहं निवेदयिष्यामि।'

तथाऽनुष्ठिते, द्वीपिना भिन्नां त्वचं विज्ञाय, जम्बुकेनाऽभिहितं– भो भगिनीसुत! गम्यताम् ।एष सिंहः समायाति।' तद् श्रुत्वा चित्रको दूरं प्रनष्टः।

अथ यावदसौ तद्भेदकृतद्वारेण किञ्चिन्मांसं भक्षयति, तावदतिसंक्रुद्धोऽपरः शृगालः समाययौ। अथ तमात्मतुल्यपराक्रमं दृष्ट्वैनं श्लोकमपठत्-

**उत्तमं प्रणिपातेन, शूरं भेदेन योजयेत्।**
**नीचमल्पप्रदानेन, समशक्तिं पराक्रमैः ।।**

(ततश्च) तदभिमुखकृतप्रयाणः स्वदंष्ट्राभिस्तं विदार्य, दिगन्तभाजं कृत्वा, स्वयं सुखेन चिरकालं हस्तिमांसं बुभुजे।

❀ ❀ ❀

## शब्दार्थाः

| | | |
|---|---|---|
| **समासादितः** | – | प्राप्तः (प्राप्त किया) |
| **समन्तात्** | – | परितः (चारों ओर) |
| **भेत्तुम्** | – | भेदनं कर्तुम्, छेत्तुं वा |
| **इतश्चेतः** | – | यत्र-तत्र (इधर-उधर) |
| **समाययौ** | – | समागतः |
| **दृष्ट्वा** | – | अवलोक्य (देखकर) |
| **लागुडिकः** | – | प्रहरी (पहरेदार) |
| **बुभुक्षिताः** | – | क्षुधिताः (भूखे) |
| **व्यसनाभिभूताः** | – | दुःखपीडिताः |
| **साध्यः** | – | साधनीयः |
| **वशकारकः** | – | वशकारी |
| **बध्यते** | – | वशीक्रियते |
| **उवाच** | – | अवोचत् |
| **नियुज्य** | – | नियुक्तं कृत्वा |
| **व्यापादितः** | – | मारितः |
| **नीतः** | – | प्रापितः |
| **भागिनेयः** | – | भगिनीपुत्रः (बहिन का पुत्र) |
| **द्वीपीः** | – | चित्रकः (चीता) |
| **व्यचिन्तयत्** | – | शुशोच (विचार किया) |
| **पार्श्वात्** | – | निकटात् |
| **रक्षपालः** | – | प्रहरी |
| **विस्रब्धम्** | – | आश्वस्तः |
| **समायाति** | – | आगच्छति |

## अभ्यासः

### वस्तुनिष्ठात्मक-प्रश्नाः–

१. 'नीत्या स्वकार्यं साधनीयम्' पाठः समुद्धृतोऽस्ति ?

(क) पञ्चतन्त्रात् (ख) हितोपदेशात्

(ग) दशकुमारचरितात् (घ) कादम्बरीतः ( )

२. पञ्चतन्त्रस्य रचयिता वर्तते ?

(क) बाणभट्टः (ख) दण्डी

(ग) विष्णुशर्मा (घ) नारायणपण्डितः ( )

३. भो भगिनीसुत ! कथमतिचिरात् दृष्टोऽसि ? अत्र 'भगिनीसुत' शब्दः प्रयुक्तोऽस्ति–

(क) सिंहाय (ख) जम्बुकाय

(ग) चित्रकाय (घ) व्याघ्राय ( )

४. 'नाहमन्येन हतं सत्त्वं कदाचिदपि भक्षयामि'– इति कस्य कथनम् ?

(क) सिंहस्य (ख) चित्रकस्य

(ग) शृगालस्य (घ) व्याघ्रस्य ( )

### अतिलघूत्तरात्मक-प्रश्नाः–

१. वनप्रदेशे किम् नाम शृगालः वसति स्म ?

२. महाचतुरकः अरण्ये स्वयं कः प्राप्तः?

३. 'स्वामिन् ! त्वदीयोऽहं लागुडिकः स्थितः.....' इति कः कथयति?

४. सिंहे गते शृगालस्य समीपे कः समाययौ ?

५. गते व्याघ्रे तत्र कः समायातः ?

६. भो भागिनेय देहि में प्राणदक्षिणाम् इति कस्य कथनमस्ति ?

### लघूत्तरात्मक-प्रश्नाः–

१. पञ्चतन्त्रस्य रचयितुः परिचयो दीयताम् ?

२. पञ्चतन्त्रस्य किं वैशिष्ट्यम् ?

३. महाचतुरेण शृगालेन सिंहः कथम् अपवारितः ?

४. व्याघ्रं शृगालः किम् अकथयत् ?

५. शृगालेन चित्रकः कथं दूरीकृतः ?

## निबन्धात्मक-प्रश्नाः–

१. 'नीत्या स्वकार्यं साधनीयम्' कथानुसारेण शृगालस्य चरित्र-चित्रणं कुरुत ?

२. पञ्चतन्त्र ग्रन्थस्य परिचयं लिखत ?

३. उपायचतुष्टयस्य वर्णनं कुरुत ?

## व्याकरणात्मक-प्रश्नाः–

**(क) अधोलिखितपदानां सन्धिविच्छेदं कृत्वा नामापि लेख्यम्-**

| पदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| इतश्चेतश्च | ............................ | ......................... |
| तस्याभिमुखो | ............................ | ......................... |
| वनेऽपि | ............................ | ......................... |
| निर्व्याघ्रम् | ............................ | ......................... |
| कश्चित् | ............................ | ......................... |
| व्यचिन्तयत् | ............................ | ......................... |
| पार्श्वादस्य | ............................ | ......................... |

**(ख) अधोलिखितपदानां समासविग्रहं कृत्वा तस्य नामापि लेखनीयम्-**

| सामासिकपदम् | समासविग्रहः | समासनाम |
|---|---|---|
| संयोजितकरयुगलः | ................. | ................. |
| मृगमांसभक्ष्या | ................. | ................. |
| वशकारकः | ................. | ................. |
| सर्वगुणसम्पन्नः | ................. | ................. |
| उन्नतकन्धरा | ................. | ................. |
| अल्पप्रदानेन | ................. | ................. |
| भगिनीसुत | ................. | ................. |
| अश्रद्धेयम् | ................. | ................. |
| सानन्दम् | ................. | ................. |

**(ग) अधोलिखितपदानां विभक्तिः वचनञ्च लिख्यताम्-**

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| अरण्ये | ...................... | ........................... |

| | | |
|---|---|---|
| गर्वात् | ...................... | ........................... |
| सिंहेन | ...................... | ........................... |
| चित्रक: | ...................... | ........................... |
| भगिनीसुत ! | ...................... | ........................... |

(घ) **अधोलिखितपदानां धातु: लकारा: पुरुष: वचनञ्च लेखनीय–**

| पदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| आसीत् | .......... | ........... | ........... | .......... |
| परिभ्रमति | .......... | ........... | ........... | .......... |
| उवाच | .......... | ........... | ........... | .......... |
| भक्षयतु | .......... | ........... | ........... | .......... |
| भविष्यति | .......... | ........... | ........... | .......... |
| देहि | .......... | ........... | ........... | .......... |
| सन्ति | .......... | ........... | ........... | .......... |

(ङ) **निम्नलिखितेषु पदेषु प्रकृति: प्रत्ययश्च पृथक् लिख्यताम्-**

| पदम् | प्रकृति: | प्रत्यय: |
|---|---|---|
| भेत्तुम् | .......................... | .......................... |
| अभिभूता: | .......................... | .......................... |
| श्रुत्वा | .......................... | .......................... |
| तृप्तिम् | .......................... | .......................... |
| कार्यम् | .......................... | .......................... |

(च) **अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत् –**

| पदम् | वाक्यम् |
|---|---|
| भूत्वा | ............................................................................................. |
| प्रणिपातेन | ............................................................................................. |
| नीतिमार्गम् | ............................................................................................. |
| प्रयोक्तव्य: | ............................................................................................. |
| समायाति | ............................................................................................. |
| नियुज्य | ............................................................................................. |

❀ ❀ ❀